# अम्ब नीलायताक्षि

## रागम्ः नीलाम्बरि     ताळम्ः आदि

*श्री मुत्तुस्वामि दीक्षित विरचिता*

पल्लवि

अम्ब नीलायताक्षि करुणाकटाक्षि
अखिललोकसाक्षि कटाक्षि

अनुपल्लवि

बिम्बाधरि चित्प्रतिबिम्बाधरि बिन्दुनादवश ङ्करि शङ्करि

मध्यमकल साहित्यम्

अम्बुजारमणसोदरि आदरि अम्बरि कादम्बरि नीलाम्बरि

चरणम्

शिवराजधानीक्षेत्रवासिनि श्रितजनविश्वासिनि

शिवकायारोहणेशोल्लासिनि चिद्रूपविलासिनि

नवयोगिनीचक्रविकासिनि नवरसदरहासिनि
सुवर्णमयविग्रहप्रकाशिनि सुवर्णमयहासिनि

मध्यमकल साहित्यम्

भुवनोदयस्थितिलयविनोदिनि भुवनेश्वरि क्षिप्रप्रसादिनि
नवमाणिक्यवल्लकीवादिनि भवगुरुगुहवेदिनि संमोदिनि

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇